दध्ना जुहोतीति वाक्येन पुनरनुवादेन दधिकरणकत्वमात्रं तत्र विधेयम्। तत्र होमस्यानुवादः एवमन्यत्राप्यूह्यम् अनुवादः पूर्व्वस्येति का०४,३,१८, "य इष्ट्यात्यनेन वाक्येन पौर्णमास्याममावस्यायां वा विकृतीनामनुष्ठानमुच्यते तच्च प्रकृतितः प्राप्तमेव अतः कारणात् य इष्ट्येत्यनुवाद इति तद्व्या०। अनुवादश्च त्रिविध भूतार्थानुवादः स्तुत्यर्थानुवादः गुणानुवादश्चेति। तत्र सदेव सौम्येदमग्र आसीदित्यादौ भूतार्थानुवादः। "वायुर्वै क्षिपिष्ठा देवतेत्यादौ, स्तुत्यर्थानुवादः। वायव्यं श्वेतं छागमालभतेत्यादौ प्राप्ताया वायुदेवतायाः स्तुत्यर्थत्वात् तस्य स्तुत्यर्थानुवादत्वम्। अग्निहोत्रं जुहोतीति प्राप्तस्याग्निहोत्रहोमस्य गुणविधानार्थं प्रवृत्तं दध्ना जुहोतीत्यादि गुणानुवादः। एवमन्यान्युदाहार्य्याणि। अनुलक्षणकथने। "क उत्तमः श्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नादिति" भाग० "सिद्धोपदेशे च "अनुवादे चरणानामिति" पा०। "सिद्धोपदेशे" इति सि०कौ०।

**अनुवादक** त्रि० अनुवदति अनु+वद–ण्वुल्। अनुवादकारके अनुवदनशीले च।

**अनुवादिन्** त्रि० अनुवदति अनु+वद–णिनि। अनुवादकारके, अनुवदनशीले, युक्तगीतानुवादिनि च स्त्रियां ङीप्।

**अनुवाद्य** त्रि० अनु+वद–ण्यत्। उद्देश्ये प्राप्तावपि किञ्चिद्विधानार्थमनुकीर्त्तनीये। "अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेदिति वृद्धाः तथा च। पर्वतो वह्निमानित्येव प्रयोक्तव्यं न वैपरीत्येन, तथा प्रयोगे तु आलङ्कारिकैः वाक्यगतविधेयाविमर्शदोषो भवतीति प्रतिपादितम् यथा "न्यक्कारो ह्ययमेव मे यदरयः" इति वाक्ये अयमेव न्यक्कार इति प्रयोक्तव्ये तद्वैपरीत्येन प्रयोगात्तथात्वम्। अतएव "वृद्धिरादैच्" इति पा० सूत्रे आदैच् वृद्धिसंज्ञः स्यादित्यर्थके वृद्धेर्विधेयत्वेन पूर्व्वनिर्देशावश्यम्भावेऽपि वृद्धिशब्दस्य मङ्गलार्थत्वेन प्राक्प्रयोगो भाष्यादौ समर्थितः यथा "पूर्व्वोच्चारितः" संज्ञी परोच्चारितः संज्ञेत्याक्षिप्य "एतदेकमाचार्य्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्य्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च वृद्धियुक्ता यथा स्युरित्यन्तेन"। "माङ्गलिको मङ्गलप्रयोजनः। महतोऽर्थतः एकैकं सूत्रं शास्त्रमिति शास्त्रौघस्येत्युक्तम्। मङ्गलादीनीत्यादिना स्वप्रयोजनं श्रोतृप्रयोजनञ्चोक्तम्। प्रथन्ते विस्तृतानि भवन्ति तेन समाप्तिर्द्योत्यते" भा०उद्यो०।

**अनुवासन** न० अनु+वास–सौरभ्ये ल्युट्। धूपादिभिः सुरभीकरणे, वैद्यौक्ते स्नेहाद्यैः वस्तिकर्म्मणि च। "द्विधा वस्तिः परिज्ञेयो निरूहश्चानुवासनम्। कषायाद्यैर्निरूहः स्यात् स्नेहाद्यैरनुवासनम्" इति वैद्यकम्। अनुवसति, अनुवासरं दीयते वा घ०। सुश्रुतोक्ते अनुवासनद्रव्ये पु०। तत्र यथाप्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवासनः पादावकृष्टः। अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयत इत्यनुवासनः। तस्यापि विकल्पोऽर्द्धार्द्धमात्रावकृष्टोऽपरिहार्य्यो मात्रावस्तिरिति"। "निरूहः शोधनो लेखी स्नेहनो वृंहणो मतः। निरूहशोधितान् मार्गान् सम्यक् स्नेहोऽनुगच्छति। अपेतसर्वदोषासु नाडीष्विव वहज्जलम्। सर्वदोषहरश्चासौ शरीरस्य च जीवनः। तस्माद्धि शुद्धदेहस्य स्नेहवस्तिर्विधीयते" इति। "तत्रोन्मादभयशोकपिपासारोचकाजीर्णार्शपाण्डुरोगभ्रममदमूर्च्छाच्छर्दि-कुष्ठ-मेहोदर-स्थौल्यश्वासकासकण्ठशोषशोकोपसृष्टक्षतक्षीणचतुर्स्त्रिमासगर्भिणी दुर्बलाग्न्यृतुसहा बालवृद्धौ च वातरोगादृते क्षीणा नानुवास्या नास्थापयितव्याः उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः। असाध्यता विकाराणां स्यादेषामनुवासनात्" इति च सुश्रुतम्। अजादिवस्तिचर्म्मघनवस्त्रादिनिर्मितेन (पिचकारीति) प्रसिद्धयन्त्रेण धातुवैषम्यदोषनाशाय लिङ्गद्वारेण योनिद्वारेण वा दीयमानं स्नेहादिद्रव्यमनुवासन इति वैद्यकप्रसिद्धिः। अधिकं वस्तिकर्म्मशब्दे वक्ष्यते। अनुवासनं प्रयोजनमस्य अनुप्रवच० छ। अनुवासनीयः अनुवासनहेतौ त्रि०।

**अनुवासित** त्रि० अनु–वास–क्त। सुरभीकृते, वस्तिकर्म्मणा चिकित्सिते च।

**अनुवास्य** त्रि० अनु+वस–कर्म्मणि यत्। सुरभीकार्य्ये वस्तिकर्म्मणा चिकित्स्ये च। "अवश्यं स्थापनीयास्ते नानुवास्याः कथञ्चनेति" सुश्रुतम्।

**अनुविधायिन्** त्रि० अनु+विधत्ते अनु+वि+धा–णिनि। पश्चाद्विधायिनि, अनुगते च। "गुणानां तदन्वयव्यतिरेकानुविधायित्वमिति" सा०द०।

**अनुविद्ध** त्रि० अनु+व्यध–क्त। संसृष्टे। "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिवार्थो हि सर्वः शब्देन भासते" इति वाक्यप०। "कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुट" इति सा०द०। [आवन्त्याविति" भा०भी०प०।

**अनुविन्ध्य** पु० अवन्तिदेशीये नृपतिभेदे "विन्ध्यानुविन्ध्या–